National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(61): 34-38
© 2025 NJHSR
www.sanskritarticle.com

**Dr. S. Sitarama Rao,**
Asst.Professor,
Sri Venkateswara Vedic University,
Tirupati .

**Correspondence:**
**Dr. S. Sitarama Rao,**
Asst.Professor,
Sri Venkateswara Vedic University,
Tirupati .

# “वेदव्यासवैशिष्ट्यम्”

**Dr. S. Sitarama Rao**

**उपोद्घातः -**

वेदव्यासः हिन्दूपरम्परायां कश्चन प्रमुखः। सुप्रसिद्धस्य श्रीमन्महाभारतस्य रचनाकारः भगवान् व्यासः। पुरा किल अध्ययनार्थतिविशालः एक एव वेदराशिः आसीत्। किन्तु कलियुगे मानवानामल्पायुः, परिमितबुद्धिसामर्थ्यं चावलोक्य श्रीव्यासो वेदराशिं ऋक्, यजुः, सामः, अथर्वश्चेति चतुर्षु भागेषु विभज्य एकैकं वेदराशिं वेदसंरक्षणं चाकरोत्। वेदानां प्रचाराय चतुरः शिष्यान् नियुक्तवान्। ऋग्वेदपाठकत्वेन पैलः, यजुर्वेदपाठकत्वेन वैशम्पायनः, सामवेदपाठकत्वेन जैमिनिः, अथर्ववेदपाठ-कत्वेन सुमन्तुः च तेन योजिताः। यजुर्वेदमन्त्रैः अध्वर्युः, ऋग्भिः होता, सामभिः उद्गाता, अथर्वमन्त्रैः ब्रह्म च यज्ञे भागं यथा वहेयुः तथा अकरोत्। महर्षिः याज्ञवल्क्यः यजुर्वेदवृक्षं सप्तविंशतिशाखाभिः विभज्य एकैकां शाखाम् एकस्मै शिष्याय अबोधयत्। एवं वेदानां विभागः अनेन कृतः इत्यतः “वेदव्यास” इति एतस्य नाम समजनि। अस्य शरीरं कृष्णवर्णीयमासीदित्यतः 'कृष्णः' इति तस्य नाम जातम्। द्वीपे अस्य जन्म अभवदित्यतः ‘द्वैपायनः’ इति नामान्तरम् अप्यस्ति। एवं नाम्नोः संयोगत्वात् “कृष्ण‘द्वैपायनः” इति तम् आह्वयन्ति। बदरिकावने अस्य निवासः आसीदिति कारणेन एतस्य नाम ‘बादरायणः’ इत्यपि सञ्जातम्। शास्त्रानुसारं सः भगवतः नारायणस्य अंशावतारः वर्तते।

**“मुनीनामप्यहं व्यासः कवीनामुशना कविः”[१]॥**
**इति श्रीकृष्णपरंब्रह्मणः वचनमस्ति किल।**
**“अचतुर्वेदनो ब्रह्मा द्विबाहुरपरो हरिः ।**
**अफाललोचनश्शम्भुः भगवान् बादरायणः”[२]॥**

इत्यनेन श्लोकेन भारतीयास्सर्वे व्यासं त्रिमूर्त्यात्मकं मन्यन्ते इति ज्ञायते।

चेदिराज-नामकः उपरिचरवसुः एकदा मृगयायै निर्गतः आसीत्। तस्मिन् समये सुगन्धितपवनं, सुन्दरवातावरणम् इत्यादिना प्रभावितः राजा स्वपत्नीम् अस्मरत्। कामवेगस्य आधिक्यत्वात् तस्य वीर्य-स्खलनम् अभवत्। तं वीर्यं स्वस्य पत्नीं प्रति प्रेषयितुं राजा श्येनपक्षिणे प्रार्थनामकरोत्। श्येनः यदा तं वीर्यं नयन् आसीत्, तदा तं मांसपिण्डं मत्वा मार्गे कश्चन अपरः श्येनपक्षी अपाकर्षयत्। तयोः कहलेन सः वीर्यः कालिन्द्याः जले अपतत्। तस्यां नद्यां ब्रह्मणः शापवशेन मत्स्यरूपेण अद्रिकानामिकाः अप्सरसः निवसन्ति स्म। सा तस्य वीर्यस्य निगिलनम् अकरोत्। फलतः तस्याः मत्स्यरूपिणां अप्सरसां गर्भात् पुत्री, पुत्रश्च समुद्भूतौ। पुत्रस्य नाम मत्स्यः, यः विराटराजा अभवत्। पुत्र्याः नाम काली। सा केनचित् धीवरेण वर्धिता। काली उत मत्स्यगन्धा यदा किञ्चित् ज्येष्ठा अभवत्, तदा सा स्वस्य पितुः नौचालने साहाय्यं करोति स्म।

पराशरः कश्चन मन्त्रद्रष्टा ऋषिः, शास्त्रवेत्ता, ब्रह्मज्ञानी, स्मृतिकारश्च आसीत्। अयं महर्षिणः वसिष्ठस्य पौत्रः, वैदिकसूक्तद्रष्टा, ग्रन्थकारोऽपि।

एकदा प्रातःकाले पराशरः यमुनां उल्लङ्घयितुमागतः। सः कामपूर्त्यै कालीमप्रार्थयत्। अन्यः कोऽपि द्रष्टुं न शक्नुयात् इत्युद्देशत्वात् मुनिः अन्धकारं सृष्ट्वा तया सह सम्भोगमकरोत्, तेन कारणेन पराशरस्य पुत्रः समजनि। स एव पाराशरः। अत एव -

**“व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ।**
**नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः”**[३] ॥

इति वयं स्मरामः।

आषाढमासे शुक्लपक्षे पूर्णिमा तिथौ व्यासः सञ्जातः। अतः इयं तिथिः गुरुपूर्णिमा व्यासपूर्णिमा वेति कथ्यते। अस्मिन दिने श्रीव्यासप्रतिमापूजनं, गुरुप्रतीकं ग्रन्थपूजनं चापि कुर्वन्ति। हिन्दवः, भारतीयसंस्कृतिश्च यावत्पर्यन्तं तिष्ठति तावत्पर्यन्तम् एतस्य नाम अजरामरमेव । जगति एषः एव महान् श्रेष्ठः पथप्रदर्शकः, शिक्षकश्च इत्युच्यते। अतः तेन ‘जगद्गुरुः’ इति उन्नतस्थानं प्राप्तमस्ति।

संस्कृतवाङ्मये आदिकविः वाल्मीकेः अनन्तरं द्वितीयः कविः व्यासः एव। व्यासस्य शैली अपि वाल्मीकेरिव सरला वर्तते। व्यासमहर्षिः प्रप्रथामं श्रीमन्महाभारतमिति उद्ग्रन्थं व्यरचयत्। वेदानामुपनिषदां च पठनं न सर्वेषां सुलभमिति मत्वा महामुनिरयं स्वीये भारतग्रन्थे यथावसरं तत्र तत्र वेदोक्तधर्मानपि विशदीचकार। अतः एव महाभारतस्य पञ्चमवेदः इति ख्यातिः अस्ति। प्रायशः महाभारतमपि आधिक्येन अनुष्टुप्छन्दसा एव उपनिबद्धमस्ति। “यतो धर्मः ततो जयः” इति महाभारतस्य सारः।

पराशरस्य आश्लेषेण काली सुवासयुक्ता सत्यवती अभवत्। सत्यवती योजनगन्धा-रूपिणं वरदानं प्राप्तवती। महर्षिः वेदव्यासः त्रिकालदर्शी, इच्छागतिमान् च आसीत्। एषः सर्वस्य मनसः चिन्तनं ज्ञातुं शक्नोति स्म। यत्र इच्छति क्षणाभ्यन्तरे तत्र गन्तुं शक्नोति स्म। जन्मानुक्षणं मातुराज्ञां प्राप्य तपः कर्तुं वनं गतवान्। गमनसमये उक्त्वा गतवान् यद् – ‘यदा भवत्यै मम आवश्यकता भवति तदा मां स्मरतु। अहं भवत्याः समीपे उपस्थितः भविष्यामि’ इति। एषा सत्यवती एव कालान्तरे शन्तनोः पत्नी अभवत्। अस्याः गर्भात् चित्राङ्गदः, विचित्रवीर्यः च पुत्रौ समुद्भूतौ। विचित्रवीर्यस्य विवाहः काशीराजस्य पुत्रीभ्यां अम्बिकाम्बालिकाभ्यां सह अभवत्। परन्तु सः निस्सन्तानः मृतः। तदा सत्यवत्याः आनुग्रहेण अम्बिकया, अम्बालिकया च सह व्यासस्य नियोगः अभवत्। नियोगफल स्वरूपं पाण्डु- धृतराष्ट्रयोः जन्म अभवत्। महाभारतं लक्षश्लोकात्मकः विस्तृतः ग्रन्थः। “महत्वात् भारवत्वात् च महाभारतमुच्यते” इति आर्योक्तिरप्यास्ति। श्रीकृष्णपरमात्मनः अमरमुपदेशं स्वस्य महाभारतस्य संहितायां योजयित्वा जगतः महदुपकारं कृतवानस्ति व्यासमहर्षिः। व्यासः भारतकथां पुत्रं शुकं, शिष्यं वैशम्पायनं च बोधितवान्। वैशम्पायनः जनमेजयं तां कथामवदत्। जनमेजयेन उक्ता भारतकथा एव इदानीमुपलभ्यते।

**“धर्मे चार्थे च कामे च मोक्षे च पुरुषर्षभ ।**
**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्”**[४]॥

इत्युक्तवत् व्यासः महाभारतग्रन्थे वेदोक्तं सर्वस्वं धर्मस्वरूपं उपनिबद्धवान्। अत एव महाभारतम् पञ्चमवेदः इति ख्यातिमलभत। रामायणे इव अत्रापि ब्रह्मा व्यासं भारतकथालेखनाय प्रोत्साहयति। व्यासः योग्यस्य लेखकस्य अभावं वदति। तदा विघ्नेश्वरः श्रीमन्भारतकथायाः लेखनकार्यमङ्गीकरोति। व्यासेन उक्तां भारतकथां सः लिखति च। महाभारते बह्वयः उपकथाः उपलभ्यन्ते। अतः भारतकथामवलम्ब्य विविधैः कविभिः बहूनि गद्यपद्यचम्पू-काव्यादीनि लिखितानि। भगवद्गीता, हरिवंशः इत्यादयः अपि महाभारते एव अन्तर्भवन्ति। कौरवाणाम् उपरि पाण्डवानां विजयकारणेन एतत् काव्यं 'जय' इति नाम्ना विख्यातम्। केषाञ्चिद् अभिप्रायः अस्ति यद् अधर्मस्योपरि धर्मस्य विजयकारणेन एतस्य नाम 'जयः' इति अभूत्। कौरवाणाम् उपरि पाण्डवानां विजयकारणेन एतत् काव्यं 'जय' इति नाम्ना विख्यातम्। अतः –

**“नारायणं नमस्कृत्य नरं चैव नरोत्तमम्।**
**देवीं सरस्वतीं चैव ततो जयमुदीरयेत्”**[५]॥

इति मङ्गलश्लोकः प्राप्यते।

महाभारतं - केवलम् एतावदेव न अपि तु 'महाभारत' इति शब्दे यद् 'महत्' विशेषणं वर्त्तते तदपि अष्टादशसंख्यामेव सूचयति । यथा- म य र ल व श ष स ह । मकारतः (मकारं सम्मिल्य) हकारपर्यन्तं नववर्णाः भवन्ति। तथैव हकारतः (हकारं सम्मिल्य) मकारपर्यन्तमपि नववर्णाः एव भवन्ति। अनयोः नवनवयोः संयोगे सति अष्टादशसंख्या एव समायाति। ‘जय, भारत तथा महाभारत' इत्येभिः शब्दैः यस्याः अष्टादशसंख्यायाः बोधो भवति तत्र 'जय' इति शब्दे प्रथमवर्णस्य त्यागेन गणना, भारतमहाभारतयोश्य शब्दयोः प्रथमवर्णस्य सम्मेलनेन गणना पाणिनिव्याकरणस्य “स्थानेऽन्तरतमः' इति सूत्रानुसारिणी बोध्या।

श्रीमद्भगवद्गीता महाभारतस्य भीष्मपर्वणि विद्यते। यदा अर्जुनः महाभारतयुद्धे विचलितः भूत्वा स्वकर्तव्यतः विमुखः आसीत् तदा भगवता श्रीकृष्णेन महाभारतयुद्धे स्वमित्रं कुन्तीपुत्राय उपदिष्टा भवति। यतःअर्जुनः स्वबान्धवैः सह युद्धं कर्तुम् नेच्छति स्म। भगवद्गीता यावत् पृथिव्यां मानवजीवनं वर्तते तावत् प्रासङ्गिकं भविष्यति ।

वेदव्यासः अष्टादशपुराणानि, सङ्क्षेपेण उपनिषदः तत्त्वान् बोधयितुं ब्रह्मसूत्राणां निर्माणम् अकरोत्। तेषां विषये अनेके आचार्याः भाष्याणि रचयित्वा स्वेषां विभिन्नानभिप्रायान् प्रकटितवन्तः। ‘व्याससमृतिः’ एतेन रचितः कश्चन स्मृतिग्रन्थः। वेदान्तशास्त्रेषु

'प्रस्थानत्रयम्' सुविख्यातम्। तानि च प्रस्थानानि - १. उपनिषदः, २. भगवद्गीता, ३. ब्रह्मसूत्राणि चेति।

वेदानां ११३१ शाखाः सन्ति। प्रत्येकस्यां शाखायां मन्त्रस्य एके, ब्राह्मणस्य एकं, आरण्यकस्य एकं, उपनिषदः एकं च भवति। एतेषां संयोगः एव वेद इत्युच्यते। संहितायां केवलं द्वादशशाखाः एवं उपलभ्यन्ते। अस्मिन् भागे ऋषिभ्यः इन्द्रः, अग्निः, विष्णुः आदि नाम्ना एकस्याः चेतनसत्तायाः परब्रह्म, परमात्मनः स्तुतिः कृता वर्तते। वेदस्य ब्राह्मणभागः कर्मप्रधानः। वानप्रस्थाश्रमस्य नियमानाम् उल्लेखः आरण्यके उपलभ्यते। उपनिषत्सु वेदवाब्ययज्ञानं निश्चितम्। संहिता-ब्राह्मण-आरण्यकापेक्षया उपनिषत् अधिकसंख्यासु उपलभ्यते। प्रायः १०८ उपनिषदः उपलभ्यन्ते। यद्यपि बहुभिः आचार्यैः उपनिषद-धिकृत्य भाष्यं लिखितं वर्तते, महर्षिणा वेदव्यासेन उपनिषत्सारम् एव एकत्र आनीय वेदान्तदर्शननाम्ना ख्यातिमलभत।

व्यासेन ब्रह्मसूत्रमिति ग्रन्थः लिखितः। वेदान्तदर्शनस्याधारभूतोऽयं ग्रन्थः। अस्मिन् अनेकाः मणयः एकस्मिन् सूत्रे आरचिताः। एवमेव प्रकारेण विभिन्नमतं, सिद्धान्तः तथा जीव-जगत् प्रकृत्यादितत्त्वानि एकस्मिन्नेव ब्रह्मसूत्रे आरचितानि। ब्रह्मसूत्रनाम्न्ना च व्यवहारे समानीतं वर्तते।

वेदव्यासः अष्टादशपुराणानि व्यरचयत्। पुराणानां कथाभिः सरलतया सर्वसाधनं शीघ्रं बुद्धिगम्यं कर्तुं शक्यते। वेदवाक्यबोधितामिति-कर्तव्यतां पुराणेषु कथानकरूपेण मनोग्राह्यां विधातुम् ऐहलौकिकं पारलौकिकं च जीवनं सफलयितुमादेशो दत्तोऽस्ति। प्रधानतया पुराणेषु-सर्ग-प्रतिसर्ग - वंश - मन्वन्तर - वंशानुचरितेति पञ्चलक्षण-मादाय मानवजीवनस्य चरमलक्ष्यभूतान् परमपुरुषार्थान् धर्मार्थ-काममोक्षान् प्राप्तुमैतिहासिककथानकाधारेण प्रभावपूर्ण पद्धतौ ज्ञानविज्ञानयोः विस्तारः प्रदर्शितोऽस्ति ।

**"मुनयोऽष्टादश प्राहुः क्षुल्लकानि महान्ति च।**
**ब्राह्मं पाद्मं वैष्णवं च शैवं लैङ्गं सगारुडम्॥**
**नारदीयं भागवतमाग्नेयं स्कान्दसंज्ञितम्।**
**भविष्यं ब्रह्मवैवर्तं मार्कण्डेयं सवामनम्।**
**वाराहं मात्स्यकौर्मं च ब्रह्माण्डाख्यमिति त्रिषट्"[६]॥**

अत एव भागवतमपि अष्टादशमहापुराणानामन्तर्भावितत्वादेभिः लक्षयितुं शक्यते। एतेषां लक्षणानां व्याप्तिरस्मिन्नपि वर्तते, यदिदमपि महापुराणपदवीमनुगतमेवेति। पुराणेषु यावत् सुगमं चतुर्वर्गस्य सिद्धेः साधनमुपलभ्यते व्यासेन अष्टादशपुराणेषु सर्वेषां धर्माणां सारः परोपकारः पुण्यम्, परपीडनं महत्पापं निर्दिष्टमस्ति। अयं मानवतायाः कीदृग् महान् मौलिक आदर्शोऽस्ति। तथा -

**अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।**
**परोपकारः पुण्याय पापाय परपीडनम्॥**

इत्यार्योक्तिरस्ति। व्यासेन सप्तदशपुराणानि विरचितान्यपि तस्य हृदये मनश्शान्तिर्नासीत्। तदा नारदः व्यास समीपमागत्य भगवतपुराणं लिखितुं प्रेरेपितवान्। अतः व्यासः श्रेमद्भागवतं, हरिवंशश्च व्यरचयत्।

पाण्डवाः विदुरस्य युक्त्या लाक्षागृहतः बहिरागत्य एकचक्रनगरे आसन्। तस्मिन् सन्दर्भे व्यासः तैः सह मेलनार्थं तत्र गतवानासीत्। प्रसङ्गवशात् सः द्रौपद्याः पूर्वजन्मनः वृत्तान्तं कथयन् 'एषा कन्या भवद्भ्यः इति एव पूर्वनिश्चिता अस्ति' इति। एतद्वचनं श्रुत्वा पाण्डवानामानन्दः उत्साहश्च वर्धितः। ते द्रौपद्याः स्वयंवरे भागं ग्रहीतुं पाञ्चालनगरमगमन्। तत्र अर्जुनः स्वयंवरस्य नियमानुसारं द्रौपदीं जितवान्। मातुः कुन्त्याः आज्ञया यदा पञ्चसहोदराः अपि तया सह विवाहं कर्तुम् इच्छन्ति तदा राजा द्रुपदः न अङ्गीकरोति। तस्मिन् समये व्यासः एव तत्रागत्य तस्याः पूर्वजन्मनः वृत्तान्तं निवेद्य पञ्चभिः सहोदरैः सह तस्याः विवाहं कारयितुं द्रुपदम् अङ्गीकारितवान्।

यदा महाराजः युधिष्ठिरः इन्द्रप्रस्थनगरे राजसूययागं कृतवान् तदापि वेदव्यासः यज्ञे भागं ग्रहीतुं स्वस्य शिष्यबृन्दैः सह आगतवानासीत्। यज्ञं समाप्य गमनसमये सः युधिष्ठिरम् "अद्यारभ्य त्रयोदशवर्षाणामनन्तरं क्षत्रियाणां महासंहारः भविष्यति। तस्मिन् दुर्योधनस्य अपराधानां निमित्तं भविष्यति भवान्" इति वदति।

पाण्डवानां सर्वस्वमपहृत्य तान् द्वादशवर्षाणां वनवासं प्रति प्रेषयित्वा अपि दुर्योधनः न हृष्टः। सः पाण्डवान् वने एव संहर्तुमुपायं चिन्तितवान्। मातुलः शकुनिः, मित्रम् कर्णः, अनुजः दुःशासनः इत्येतै-स्सह रहस्येन पाण्डवानाम् उपरि आक्रमणं कर्तुं निश्चित्य शस्त्रास्त्रैः सुसज्जीकृत रथमारुह्य वनं प्रस्थितवान्। व्यासः दिव्यदृष्ट्या एतत् दुष्टं कुतन्त्रं ज्ञातवान्। सः अनुक्षणं तत्रागत्य घोरात् दुष्कर्मणः तं निवारितवान्। अनन्तरं सः धृतराष्ट्रं 'भवान् द्यूतस्य पराजयव्याजेन पाण्डवान् वनं प्रेषितवान्। एतत् सत्कार्यं न भवति। एतस्य परिणामः उत्तमः न भवति। भवान् भवतः, भवतः पुत्राणां च हितमिच्छति चेदिदानीं वा कृतस्य दोषस्य परिहारं करोतु। दुरात्मा दुर्योधनः राज्यलोभेन पाण्डवान् मारयितुम् यतति। पाण्डवान् यदि मारयितुं यत्नं करोति तर्हि तेन तस्य प्राणाः दातव्याः भवेयुः। भवान् यदि पुत्रस्य द्वेषबुद्धेः निवारणं कर्तुं यत्नं न करोति तर्हि अनर्थः भविष्यति। दुर्योधनः एक एव गत्वा किञ्चित्कालं पाण्डवानां समीपे तिष्ठतु इति मम अभिप्रायः। पाण्डवानां सत्सङ्गेन तस्य द्वेषभावः अपगच्छेत्, प्रेमभावस्य जागरणं भवेत्। एतद् कठिनम् अस्ति। यतः जन्मतः आगतस्य स्वभावस्य परिवर्तनं सहजं न भवति। पाण्डवैः सह भवतः पुत्राः मिलित्वा तिष्ठन्ति चेत् कुरुवंशः अवशिष्यते। किञ्चित् कालाभ्यन्तरे महर्षिः मैत्रेयः अत्र आगमिष्यति। सः भवतः पुत्रानुद्दिश्य 'स्नेहेन सर्वे सहजीवनं कुर्वन्तु' इति उपदेशं करोति। चिन्तनं विना

भवन्तः तस्य वचनं शृण्वन्तु। अन्यथा सः कोपेन शापं दद्यात्' इत्यपि व्यासः उक्तवान्। तथैव किञ्कालानन्तरं मैत्रेयः तत्र आगत्य बोधनं कृतवान्। किन्तु दुर्योधनः तस्य वचनं न श्रुतवान्। अतः महर्षेः कोपस्य परिणाममनुभूतवान्।

यदा पाण्डवाः वने आसन् तदा कदाचित् सः आगत्य युधिष्ठिर द्वारा अर्जुनाय स्मृतिविद्यायाः उपदेशं दत्तवान्। ततः अर्जुनेन देवदर्शनस्य योग्यता प्राप्ता। तावदेव न, व्यासः सञ्जयाय दिव्यदृष्टिमपि दत्तवान्। तेन कारणेन सः युद्धस्य सर्वान् विषयान् ज्ञातुं शक्नोति स्म। भगवतः विश्वरूपस्य दिव्यचतुर्भुजस्य रूपस्य देवदुर्लभदर्शनस्य च योग्यतामपि प्राप्तवान्। साक्षाद्भगवतः मुखतः भगवद्गीतायाः दिव्योपदेशमपि श्रुतवान्। अर्जुनेन विना अन्ये केऽपि गीतां न श्रुतवन्तः। दिव्यदृष्टेः प्रभावतः सञ्जयाय एषा योग्यता आगता। सः तु साक्षान्नारायणस्य अंशः एव आसीत् ।

धृतराष्ट्रः, गान्धारी, कुन्ती च यदा वने आसन् तदा कदाचिद्युधिष्ठिरः तान् द्रष्टुं परिवारैः सह तत्र गतवानासीत्। तदा व्यासोऽपि तत्रागतवान्। धृतराष्ट्रगान्धार्योः पुत्रशोकः इतोऽपि शान्तः नासीत्। कुन्ती अपि बान्धवानां वियोगेन दुःखमग्ना अस्तीति ज्ञात्वा व्यासः धृतराष्ट्रं 'वरः पृच्छ्यताम्' इति वदति। युद्धे मृतानां पुत्राणां मित्राणां च गतिः का स्यादिति सः ज्ञातुमिच्छति। "एकवारं तान् सर्वान् द्रष्टुम् इच्छामि" इति सः व्यासं प्रार्थितवान्। व्यासः वदति यद् – शयनानन्तरम् उत्थितं मानवमिव अद्य रात्रौ भवन्तस्सर्वे मृतान् बन्धून् पश्यन्ति' इति। सर्वे सायंकर्माणि समाप्य गङ्गातटे मिलितवन्तः।

व्यासः गङ्गायाः पवित्रं जलं प्रविश्य युद्धे मृतान् कौरवान् पाण्डवान् च उच्चैः आह्वयति। अनुक्षणं यथा कुरुक्षेत्रस्य अङ्गणे युद्धाय समावेशितानां सैन्यानां कोलाहलः श्रूयते स्म तथा शब्दः जलेऽपि श्रुतः। अनन्तरं युद्धे वीरगतिं प्राप्तवन्तः सर्वे राजानः, राजकुमाराश्च भीष्मद्रोणादीनां नेतृत्वे एव जलतः बहिरागतवन्तः। ते युद्धसमये यथावेषधारणं, ध्वजं, वाहनं, दिव्यवस्त्रं, दिव्यमालाः, कुण्डलं च धृतवन्तः आसन् तथा एव इदानीमपि धृतवन्तः आसन्। सर्वाणि शरीराणि अपि दिव्यप्रभया कान्तियुक्तान्यासन्। प्रत्येकमपि क्रोधरहितः, द्वेषासूयारहितः, निरभिमानयुक्तश्च दृश्यन्ते स्म। गन्धर्वाः तेषां यशोगानं कुर्वन्तः आसन्। वन्दीजनाः तेषां स्तुतिं कुर्वन्तः आसन्। तदा व्यासः धृतराष्ट्राय दिव्ये नेत्रे दत्तवानासीत्। अतः सः सम्यक् सर्वान् योधानपश्यत्। तत् दृश्यं तु अत्यद्भुतम्, अचिन्त्यं, रोमाञ्चकारि च आसीत्। सर्वे तदेकदृष्ट्या तत् दृश्यं दृष्टवन्तः। आगताः जनाः क्रोधेन विना बन्धुभिः सार्धं मिलितवन्तः। एवम् आरात्रि प्रेमीणां समागमः चलति स्म। अनन्तरं ते सर्वे यथा आगतवन्तः तथैव भागीरथ्याः जलं प्रविश्य स्वलोकान् गतवन्तः। तदा व्यासः वदति 'काः अपि स्त्रियः पत्युः लोकं गन्तुमिच्छन्ति चेत् गङ्गायां प्रवेशः करणीयः' इति। तच्छ्रुत्वा बह्व्यः स्त्रियः जलं प्रविश्य मानवदेहं त्यक्त्वा पत्युः लोकं गतवत्यः। एताः अपि दिव्यं वस्त्राभूषणं धृत्वा विमानयाने उपविश्य गतवत्यः।

अत्र राजा जनमेजयः वैशम्पायनस्य मुखतः एतमद्भुतं वृत्तान्तं श्रुत्वा बहुकुतूहलम् अनुभूतवान्। सोऽपि स्वस्य स्वर्गवासिनः पितुः महाराजस्य परीक्षितस्य दर्शनं कर्तुम् ऐच्छत्। व्यासः तदापि तत्रैवासीत्। सः तस्य इच्छापूरणाय राजानं परीक्षितं तत्र आहूतवान्। जनमेजयः यज्ञान्ते स्नानसमये स्वेन सह पितुः अपि स्नानं यदा कारयति तदनन्तरं परीक्षित् ततः प्रस्थितवान्। कलियुगारम्भसमये परिवर्तनं दृष्ट्वा व्यासः –

**"ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छ्रणोति मे।**
**धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते"**[७]॥

"उच्छ्रितहस्ताभ्यां उद्घोषयन् अस्मि, किन्तु मां कोऽपि न शृणोति। धर्मः न केवलं मोक्षं ददाति, अपितु धनं कामं च पूरयति, तर्हि जनाः तस्य अनुसरणं किमर्थं न कुर्वन्ति?" इति उच्चैः अघोषयत्।

पूर्वं व्यासः शिष्यैः सह काश्यां तपः कुर्वन्नासीत्। एकदा पार्वतीपरमेश्वरौ तस्य परीक्षणं कर्तुमैच्छताम्। सप्तदिनानि यावत् तस्मै भोजनान्वेषणे अलब्धिं कृतवन्तौ। तदा व्यासः काश्यां भोजनमप्राप्य चलितः अभवत्। ततः तत्रत्यान् जनान् शप्तुं संसिद्धोऽभवत्। अनुपदमेव अन्नपूर्णेश्वरी तस्मै प्रत्यक्षीभूय भिक्षां दत्वा "त्वमत्रत्यान् जनान् शप्तुमुद्युक्तः। तस्मात्काश्यां निवसितुमनर्हः। अन्यत्र गच्छ" इत्यादिदेश। तदा व्यासः गङ्गानद्याः अन्यस्मिन् तीरे आश्रमं परिकल्प्य निवासमकरोत्। इयमेव व्यासकशी इति प्रसिद्धिमवाप।

एकस्मिन् दिने शङ्करः गङ्गायाः तटे छात्रान् पाठयन् कक्षायाः समापनसमये वृद्धब्राह्मणः एकः तत्र समागतवान्। शङ्करः स्वकीयब्रह्मसूत्रभाष्याणां द्वारा अद्वैतसिद्धान्तस्य स्थापनं कृतवानिति यदा कथ्यते तदा वृद्धब्राह्मणः सूत्राणां विवरणमपृच्छत्। तयोर्विवादः सप्ताहपर्यन्तं यावदभवत्। अष्टमदिने पद्मपादः व्यासं विज्ञाय -

**"शङ्करः शङ्करः साक्षात् व्यासो नारायणः स्वयम्।**
**तयोर्विवादे सम्प्राप्ते किङ्करः किं करोम्यहम्"**[८]॥

इत्यवदत्। विष्णोरवतारः साक्षाद्व्यासः इति शङ्करः अग्रहीत्। अनुपदमेव शङ्करः तस्मै साष्टाङ्गं नमस्कृत्य अभिमतमर्थयत्। शङ्करः एक एव स्वकीयाभिप्रायमगृह्णादिति सन्तुष्य व्यासः शङ्करं आशीर्भिरभिनन्दयत्।

अयं महर्षिः द्वापरयुगे जातः। तेन प्रणीतेषु अष्टादशपुराणेषु इतिहासः, भूगोलः, रसायनविद्या, शास्त्रविद्या, व्याकरणम्, दर्शनम्, अर्थशास्त्रम् इत्यादयः सर्वेऽपि जीवनोपयोगिनः विषयाः अन्तर्भवन्ति। तस्मादेव "व्यासोच्छिष्टं जगत् सर्वम्" इति सूक्तिः महर्षेः व्यासस्य कृते प्रसिद्धा। नैके विद्वांसः मन्यन्ते यत् श्रीव्यासः कश्चित् एकः जनः न, अपि तु कश्चन समुदायः आसीत्। यस्मिन् पीठे उपविश्य गुरुः ज्ञानम् उपदिशति तत् 'व्यासपीठम्' इति उच्यते।

**"अश्वत्थामा बलिर्व्यासो हनुमांश्च विभीषणः।**
**कृपः परशुरामश्च सप्तैते चिरजीविनः"॥**

इत्याभाणकश्लोकेन व्यासः सप्तसु चिरजीविषु अन्यतमः इति ज्ञायते ।

**उपसंहारः -**

एवं भारतीयसाहित्यस्य, हिन्दूसंस्कृतेः विषये व्यासस्य महद्योग-दानमस्ति। श्रुति-स्मृति-पुराणोक्तस्य सनातनधर्मस्य कश्चन प्रधानः व्याख्यानकारः व्यासः इति उच्यते। अतः व्यासमहर्षिणं –

**नमोऽस्तु ते व्यास विशालबुद्धे**
**फुल्लारविन्दायतपत्रनेत्र!**
**येन त्वया भारततैलपूर्णः**
**प्रज्वालितो ज्ञानमयप्रदीपः**[९] ॥ इति
**व्यासं वसिष्ठनप्तारं शक्तेःपौत्रमकल्मषम्।**
**पराशरात्मजं वन्दे शुकतातं**[१०]॥

इति च भारतीयाः भक्त्या स्तुवन्ति।

**सहायक ग्रन्थाः**

1. श्रीमद्भगवद्गीता - श्री रामकृष्णमट् बेंगलूरू - 2006
2. व्यासस्मृतिः - नाग् प्रकाशक, दिल्ली -1998
3. विष्णुसहस्रनामस्तोत्रम् – ति.ति.दे, प्रेस्, तिरुपति - 2020
4. श्रीमद्भागवतम् – ति.ति.दे, प्रेस्, तिरुपति - 2016
5. श्रीमन्महाभारतम् – वसुन्धर पब्लिकेषन्स्, हैदराबाद - 2021

**सन्दर्भ ग्रन्थसूची**

[1]श्रीमद्भगवद्गीता.१०.३७

[2]व्यासस्मृतिः-१

[3]श्रीविष्णुसहस्रनामस्तोत्रम्.४

[4]श्रीमन्महाभारतम्.१.६२.५३

[5]श्रीमद्भागवतम्.१.२.४

[6]श्रीमद्भागवतम्.१२.७.२२-२४

[7]श्रेमन्महाभारतम्.१८.५.४९

[8]श्रीमद्भगवद्गीता.शङ्करभाष्यम्.पीठिका

[9]व्यासस्तुतिः.२

[10]श्रीविष्णुसहस्रनामस्तोत्रम्.३